इत्येषमेतैः सकलैरुपेतै-
र्द्वेषैश्च सर्व्वैः स्वपुरं सुरक्षितम् ।
राजा वसेत्तत्र गृहञ्च शुभ्रं
गुणान्वितं लक्षणसंप्रयुक्तम् ॥"
इति मात्स्ये २१८ अध्यायः ॥
(तण्डुलीयः । तत्पर्य्यायो यथा । अथ च वराह । अल्पमरुषा इति च ।
"तण्डुलीयो मेघनादः काण्डेरस्तण्डुलेरकः ।
भण्डीरस्तण्डुलीबीजो विषघ्नश्चाल्पमारिषः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

विषघ्नी, स्त्री, ( विषं हन्ति या । हन+टक् । स्त्रियां ङीप् । ) हिलमोचिका । इति त्रिकाण्डशेषः । ( अस्याः पर्य्यायो यथा,—
"मारी विषघ्नी मत्स्याक्षी चक्राङ्गी हिलमोचिका ॥"
इति वैद्यकरत्नमालायाम् ॥ )
इन्द्रवारुणी । वनवर्व्वरिका । स्वल्पफला । भूम्यामलकी । रक्तपुनर्नवा । हरिद्रा । वृश्चिकाली । ( अस्याः पर्य्यायो यथा,—
"वृश्चीपत्री वृश्चिकाली विषघ्नी नागदन्तिका ।
सर्पदंष्ट्रामराकाली चौष्ट्रधूसर पुच्छिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
महाकरञ्जः । इति राजनिर्घण्टः ॥ (चुञ्चा । तत्पर्य्यायो यथा,—
"चञ्चुवा पुष्पवन्ता च पराश्वत्थफला मता ।
मत्स्यगन्धा शोधहन्त्री विषघ्नी ध्वाङ्क्षनाशिनी ॥"
देवदाली । तत्पर्य्यायो यथा,—
"देवदाली तु वेणी स्यात् कर्कटी च गरागरी ।
देवताडो वृत्तकोशस्तथा जीमूत इत्यपि ।
पीतापरा खरस्पर्शा विषघ्नी गरनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

विषजिह्वः, पुं, देवताडवृक्षः । इति रत्नमाला ॥

विषज्वरः, पुं. (विषवत् प्राणनाशको ज्वरो यस्य ।) महिषः । इति शब्दरत्नावली ॥ विषजज्वरश्च ॥

विषण्डं, क्ली, मृणालम् । इति शब्दरत्नावली ॥

विषण्णः, त्रि, ( वि+षद+क्तः । ) विषादप्राप्तः । यथा,—
"इति विप्रियमाकर्ण्य गोप्यो गोविन्दभाषितम् ।
विषण्णा भग्नसङ्कल्पाश्चिन्तामापुर्दुरत्ययाम् ॥"
इति श्रीभागवते १० स्कन्धे २९ अध्यायः ॥

विषण्णता, स्त्री, (विषण्णस्य भावः । तल् ।) जड़ता । यथा,—
"आर्य्यं मौर्ख्यं विषादोऽवसादः सादो विषण्णता ॥"
इति हेमचन्द्रः ॥

विषतिन्दुः, पुं, कारस्करवृक्षः । इति राजनिर्घण्टः ॥ कुपीलुः । इति भावप्रकाशः ॥

विषदं, क्ली, ( विषं ददातीति । दा+कः ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ शुक्लवर्णे, पुं । इत्यमरटीका । ( निर्म्मले प्रसन्ने च त्रि । यथा, रघुः । १० । १४ ।
"योगनिद्रान्तविशदैः पावनैरवलोकनैः ।")

विषदंष्ट्रा, स्त्री, ( विषं दंष्ट्रायां यस्याः । ) सर्पकङ्काली । इति रत्नमाला ॥

विषदन्तकः, पुं, ( विषं दन्ते यस्य । कन् । ) सर्पः । इति शब्दचन्द्रिका ॥

विषदर्शनमृत्युकः, पुं, (विषदर्शने मृत्युर्यस्य । कप् ।) चकोरपक्षी । इति हेमचन्द्रः ॥

विषद्रुमः, पुं, ( विषयुक्तो द्रुमः । ) कारस्करवृक्षः । इति राजनिर्घण्टः ॥

विषधरः, पुं, ( धरतीति । धृ+अच् । विषस्य धरः । ) सर्पः । इत्यमरः ॥ ( यथा, गीतगोविन्दे । १ । १६ ।
"कालियविषधरगञ्जन जनरञ्जन ॥"
स्त्रियां विषधरी । यथाह कश्चित् ।
"धावद्घोरविभावरी विषधरीभोगस्य भीमो मणिः ॥")

विषधर्म्मा, स्त्री, कुलत्थया । इति शब्दचन्द्रिका ॥ आलकुशी इति भाषा ॥

विषधात्री, स्त्री, ( विषाणां विषधरसर्पाणां धात्री मातेव । ) जरत्कारुमुनिपत्नी । इति शब्दमाला ॥

विषनाशनः, पुं, (विषं नाशयति । ल्युः ।) शिरीषवृक्षः । इति हारावली ॥ विषनाशके, त्रि ॥

विषनाशिनी, स्त्री, ( विषं नाशयतीति । नाशि+णिनिः ।) सर्पकङ्काली । इति शब्दचन्द्रिका ॥ ( अथ रास्ना भेदनाह इति लोके । तत्पर्य्यायो यथा,—
"नाकुली सरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाङ्गी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

विषनुत्, पुं, ( विषं नुदति दूरीकरोति । नुद+क्विप् । ) श्योनाकवृक्षः । इति शब्दचन्द्रिका ॥

विषपुष्पं, क्ली, नीलपद्मम् । इति शब्दमाला ॥ विषयुक्तपुष्पञ्च ॥

विषपुष्पः, पुं, (विषयुक्तं पुष्पं यस्य ।) छर्द्दनवृक्षः । इति रत्नमाला ॥ मनफल इति भाषा ॥

विषपुष्पकः, पुं, ( विषयुक्तं पुष्पं यस्य बहुव्रीहौ कन् ।) मदनवृक्षः । इति भावप्रकाशः ॥ विषपुष्पभक्षणजन्यरोगः । इति केचित् ॥

विषभिषक्, [ ज् ] पुं, ( विषस्य विषचिकित्सको वा भिषक् । ) विषवैद्यः । इति हेमचन्द्रः ॥

विषभुजङ्गः, पुं, विषयुक्तसर्पः । इति केचित् ॥

विषमं, त्रि, असमानम् । यथा, मनुः ।
"भ्रातॄणामविभक्तानां यद्युत्थानं भवेत् सह ।
न तत्र भागं विषमं पिता दद्यात् कथञ्चन ॥"
इति दायतत्त्वम् ॥
( सङ्कटः । यथा, गीतायाम् । २ । २ ।
"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ॥"
अनतिक्रमणीयः । यथा, साहित्यदर्पणे । १० ।
"का विषमा दैवगतिः किं दुर्लभं जनः खलो लोके ॥")

विषमं, क्ली, पद्यस्य त्रिविधवृत्तान्तर्गतवृत्तविशेषः ॥ यथा,—
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्राकृता भवेत् ॥
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा ।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः ॥
आदिस्तृतीयवद्यस्य पादस्तुर्य्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम् ॥"
इति छन्दोमञ्जर्य्यां प्रथमस्तवकः ॥
वर्गमूलोक्तोर्द्धरेखा । यथा,—
"त्यक्त्वान्त्याद्विषमात् कृतिं द्विगुणयेन्मूलं समे तद्धृते
त्यक्त्वा लब्धकृतिं तदाद्यविषमाल्लब्धं द्विनिघ्नं न्यसेत् ।
पङ्क्त्यां पङ्क्तिहृते समेऽन्यविषमात् त्यक्त्वाप्तवर्गं फलं
पङ्क्त्यान्तद्द्विगुणं न्यसेदिति मुहुः पङ्क्तेर्दलं स्यात् पदम् ॥"
इति लीलावती ॥
( अर्थालङ्कारविशेषः । यथा, साहित्यदर्पणे । १० ।
"यद्यारब्धस्य वैफल्यमनर्थस्य च सम्भवः ।
विरूपयोः सङ्घटना या च तद्विषमं मतम् ॥"
उदाहरणम् ।
"क्व वनं तरुवल्कभूषणं
नृपलक्ष्मीः क्व महेन्द्रवन्दिता ॥" )

विषमः, पुं, अयुग्मराशिः । स तु मेषः मिथुनः सिंहः तुला धनुः कुम्भश्च । यथा,—
"क्रूरोऽथ सौम्यः पुरुषोऽङ्गना च
ओजोऽथ युग्मं विषमः समश्च ।
चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः ॥"
इति ज्योतिस्तत्त्वम् ॥
तालविशेषः । यथा, सङ्गीतदामोदरे ।
"चतुर्व्विधः परिज्ञेयस्तालः कङ्कननामकः ।
पूर्णः खण्डः समश्चैव विषमश्चैव कथ्यते ॥
लचतुष्कं गणौ पूर्णे खण्डे बिन्दुद्वयं गुरुः ।
यगणस्तु समे ज्ञेयस्तगणो विषमे भवेत् ॥"
( जठराग्निविशेषः । यथा,—
"मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्व्विधः ।
विषमो वातजान् रोगान् तीक्ष्णः पित्तनिमित्तजान् ॥"
इति वैद्यकरुग्विनिश्चये मन्दाग्न्यधिकारे ॥ )

विषमच्छदः, पुं, ( विषमः अयुग्मः छदो यस्य । ) सप्तच्छदवृक्षः । इत्यमरः ॥

विषमज्वरः, पुं, (विषमः ज्वरः ।) ज्वररोगविशेषः । तस्य निदानकथनपूर्व्विकां संप्राप्तिमाह ।
"दोषोऽल्पोऽहितसम्भूतो ज्वरोत्सृष्टस्य वा पुनः ।
धातुमन्यतमं प्राप्य करोति विषमज्वरम् ॥"
अयमर्थः । ज्वरोत्सृष्टस्य ज्वरेण मुक्तस्य । सन्निकृष्टं सञ्चयमाह । दोषः अल्पः ज्वरमुक्ता स्वल्पोऽपि । विप्रकृष्टं हेतुमाह । अहितमाहारविहारादि तेन सम्भूतः संपूर्णो जातः अन्यतमं धातुं रसरक्तादिकं प्राप्य दूषयित्वा